संस्कृतवार्ताः

04.04.2024

सायम् - 06:20

मुख्यवार्ताः

· लोकसभा-निर्वाचनस्य द्वितीय-चरणाय नामाङ्कनस्य अद्य अंतिम-तिथिः वर्तते ।

· भारतीयजनता-पार्टीति दलस्य वरिष्ठनेता, प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् एनडीए-सर्वकारः भारतं विकसितदेशं कर्तुं सर्वान् प्रयत्नान् करोति ।

· राष्ट्रपति-पदासीना द्रौपदी-मुर्मु-वर्या अद्य मुम्बय्याः भारतीय-प्रौद्योगिकी-संस्थाने भारतस्य प्रथमस्वदेशी-सीएआर-टी-चिकित्सा इति राष्ट्राय समर्पितवती ।

· परीक्षणं-सामरिक-बलम् (SFC) ,रक्षा-अनुसन्धान-विकास-सङ्गठनम् (DRDO) इत्यनयोः परस्पर-सहयोगेन ओडिशातः अग्निप्राइम् इति प्रक्षेपणास्त्रं सफलतया प्रक्षेपितम्।

· आईपीएल् इति क्रिकेट-क्रीडायाम् अद्य सायं अहमदाबादे गुजरात-टाईटन्स्-दलं पञ्जाब-किंग्स्-दलं सम्मुखीकरिष्यति ।

लोकसभा-नामाङ्कनम्

लोकसभा-निर्वाचनस्य द्वितीय-चरणाय नामाङ्कनस्य अद्य अंतिम-तिथिः वर्तते । अस्मिन् चरणे मणिपुर-लोकसभा-क्षेत्रेण सह द्वादशराज्याणां केन्द्र-शासितप्रदेशानां च अष्टाशीति-निर्वाचनासनेषु निर्वाचनं भविष्यति । मणिपुर-निर्वाचन-क्षेत्रस्य एकस्मिन् भागे प्रथम-चरणे मतदानं भविष्यति । केरलस्य विंशति, कर्णाटकस्य चतुर्दश, राजस्थानस्य त्रयोदश, उत्तर-प्रदेश-महाराष्ट्रयोः च क्रमशः अष्टाष्ट , मध्य-प्रदेशस्य सप्त, असम-बिहारयोः क्रमशः पञ्च-पञ्च, पश्चिम-बंगाल-छत्तीसगढयोः च क्रमशः त्रीणि-त्रीणि निर्वाचनासनेषु अस्मिन् चरणे मतदानं भविष्यति । एतदतिरिच्य त्रिपुरा-जम्मू-कश्मीरयोः अपि अस्मिन् चरणे मतदानं भविष्यति । द्वितीय-चरणस्य मतदानं अप्रैलमासस्य षड्-विंशति-दिनाङ्के भविष्यति । जम्मू-कश्मीरम् विहाय सर्वेषु राज्येषु केंद्र-शासित-प्रदेशेषु च नामाङ्कनसमीक्षा अप्रैलमासस्य पञ्चदिनाङ्के भविष्यति । जम्मू-कश्मीरे अप्रैलमासस्य षड्-दिनाङ्के नामाङ्कन-समीक्षा भविष्यति ।

## प्रधानमन्त्री-बिहारः

भारतीयजनता-पार्टीति दलस्य वरिष्ठनेता, प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् एनडीए-सर्वकारः भारतं विकसितदेशं कर्तुं सर्वान् प्रयत्नान् करोति। बिहारस्य जमुईनगरे निर्वाचनसभां सम्बोधयन् सः अवदत् यत् भारतं प्रथमः देशः अस्ति यत् चन्द्रमसः दक्षिणध्रुवे ससाफल्यम् अन्तरिक्षयानम् अवातारयत्। निर्वाचनसभां सम्बोधयन् सः अवदत् यत् भारतम् अधुना विश्वस्य पञ्चम बृहत्तमा अर्थव्यवस्था अस्ति। श्री मोदिना प्रोक्तं यत् आतङ्कि-गतिविधिषु संलग्नानाम्, समर्थकाः भारतेन यथोचितम् प्रत्युत्तरिताः । सः अवदत् यत् ये बिहारस्य युवकानां कृते किमपि हितकरं कार्यं कर्तुं नाशक्नुवन्, ते युवकेभ्यः भूमिमधिगृह्य तान् रेलसेवासु नियोजितवन्तः । प्रधानमन्त्री उक्तवान् यत् पूर्व-सर्वकाराणां कार्यकाले पुरातनानि जर्जरावस्थाप्राप्तानि च रेलयानानि प्रचालितानि आसन्, परन्तु अधुना सम्पूर्णदेशेन सदृशं बिहारस्य जनाः अपि वंदेभारत-रेलयानेन यात्रां कुर्वन्ति ।

## राष्ट्रपति-मुंबईयात्रा

राष्ट्रपति-पदासीना द्रौपदी-मुर्मु-वर्या अद्य मुम्बय्याः भारतीय-प्रौद्योगिकी-संस्थाने भारतस्य प्रथमस्वदेशी-सीएआर-टी-चिकित्सा इति राष्ट्राय समर्पितवती। अवसरेऽस्मिन् तया प्रोक्तं यत् सीएआर-टी-सेल चिकित्सा अतीव सुलभा वर्तते। इयं चिकित्सा जनेभ्यः कृते नूतनाशा: प्रदास्यति। तया कथितं यत् इयं चिकित्सा अनेक-रोगिभ्य: जीवनप्रदाने सफला भविष्यति। महाराष्ट्रस्य राज्यपाल: रमेश-बैसः प्रोक्तवान् यत् सीएआर-टी-सेल चिकित्सा न केवलं वृद्ध-रोगिभ्य:, अपितु बालकानां कृतेऽपि लाभप्रदा भविष्यति। अत्रावसरे प्रौद्योगिकी-संस्थान-मुम्बय्याः निदेशक: प्रो. शुभाशीष-चौधरी, टाटा-मेमोरियल सेंटर-इत्यस्य निदेशक: प्रो. सुदीपगुप्ता सहैव अन्येऽपि गणमान्या: तत्र उपस्थिता: आसन्।

## अग्निप्राईम्

ह्यः ओडिशातः अग्निप्राइम् इति प्रक्षेपणास्त्रं सफलतया प्रक्षेपितम्। एतत् प्रक्षेपणं ओडिशानगरस्य डॉ. ए.पी.जे. अब्दुलकलामद्वीपात् परीक्षणं-सामरिक-बलम् (SFC) ,रक्षा-अनुसन्धान-विकास-सङ्गठनम् (DRDO) इत्यनयोः परस्पर-सहयोगेन सञ्जातम् । रक्षामन्त्रालयस्य अनुसारं नवीनश्रेण्याः बैलिस्टिक-प्रक्षेपणास्त्रम् अग्नि-प्राइम् इत्यनेन सर्वाणि परीक्षण-लक्ष्याणि प्रपूरितानि, येन तस्य कार्यक्षमतायाः विश्वसनीयता संसिद्धा अभवत् । रक्षामन्त्री-राजनाथसिंहः अग्निप्राइम् - प्रक्षेपणास्त्रस्य सफलपरीक्षणम् अधिकृत्य डीआरडीओ, एसएफसी, सशस्त्रसेना

इत्येतेषाम् अभिनन्दनं कृतवान् । सः अवदत् यत् प्रक्षेपणास्त्रस्य सफलविकासः, तस्य सेनायां प्रवेशः च , सशस्त्रबलानां कृते महत्त्वपूर्णः सिद्धः भविष्यति ।

सोनिया-गांधी-राज्यसभा

कांग्रेस्-दलस्य वरिष्ठ-नेत्री सोनिया-गांधी , केंद्रीय-मंत्री अश्विनीवैष्णवः च अद्य राज्यसभायाः सांसद-रूपेण शपथवचनं स्वीकृतवन्तौ । राज्यसभायाः सभापतिः जगदीप-धनखड़-वर्यः ताभ्यां शपशवचनं ग्राहितवान् ।द्वादश अन्ये नवनिर्वाचिताः राज्यसभा-सांसदाः अपि शपथवचनं स्वीकृतवन्तः ।एतेषु भारतीय-जनता-पार्टीति दलस्य आर.पी.एन.-सिंहः, जनता-दलस्य (यूनाइटेड) संजय-कुमार-झा , कांग्रेस्-दलस्य अजय-माकनः च सम्मिलिताः सन्ति ।

केन्द्रीयान्वेषण-विभागः

केन्द्रीयान्वेषण-विभागेन शौकत-अलिः सऊदी-अरबतः भारतम् आनेतुं प्रयतते । शौकत-अलिः राष्ट्रियान्वेषण-विभागस्य वांछितापराधिनां सूच्याम् अस्ति । सऊदी-अरबतः जयपुरं प्रति अष्टादश-किलोग्राममितस्य अनधिकृत-सुवर्णायातस्य प्रकरणे एनआईए-विभागेन प्रख्यापिते आरोपपत्रे अष्टादश-जनानां सूच्यां शौकत-अली इत्यस्य नाम अपि अस्ति । केन्द्रीयान्वेषण-विभागेन सऊदी-अरबस्य राष्ट्रियकेन्द्रियविभाग इत्यनेन सह इन्टरपोल् इत्यस्य माध्यमेन शौकतअलिं भारतं प्रत्यानेतुं समन्वयं कृतम् अस्ति ।

ताइवान-भूकम्पः

ताइवानदेशे भूकम्पेन मृतकानां संख्या समेध्य नव-परिमिता समभवत्। ह्यः पूर्वीतटे भूकम्पः सप्त-दशमलव-चत्वारि-मितेन वेगेन समिङ्कतः। भूकम्पेन ताईपेई इत्यस्य हुलिएन-क्षेत्रं सहैव पर्वतीय-क्षेत्राणि च गम्भीरतया प्रभावितानि सन्ति । अधिकारिभिः नव-मृतकानां पुष्टिः कृता सहैव कथितं यत् सहस्राधिकाः जनाः व्रणिताः सन्ति । अस्मात् कारणात् केषुचित् स्थलेषु भूस्खलनमपि अभवत्। जिनवेन-किंगशुई-भ्वान्तरित-मार्गेषु अपि बहवः जनाः बद्धाः सन्ति अतः एतदर्थं सुरक्षाभियानं प्रवर्तते। अनेन भूकम्पेन हुलिएन-क्षेत्रे महती-क्षतिः जाता ।भूकम्पप्रभावेण बहूनि भवनानि भग्नानि सन्ति, मार्गणि अवरूद्धानि सन्ति सहैव रेलमार्गाणि अपि बाधितानि सन्ति ।

ताइवान-राष्ट्रपति

ताइवानस्य निवर्तमान-राष्ट्रपतिना त्साईइंग-वेन इत्यमुना द्वीपे सप्त-दशमलव-चत्वारि-मितस्य भीषण-भूकम्पस्य अनन्तरं समर्थन-प्रदानाय प्रधानमन्त्रिणे नरेन्द्रमोदिने धन्यवादः ज्ञापितः। इतः पूर्वं एकेन सार्वजनिक-सन्देशमाध्यमेन श्रीमोदिना भूकम्पेन दुरापन्नं हानिम् उद्दिश्य दुःखं प्रकटितम्।

आईपीएल्

आईपीएल् इति क्रिकेट-क्रीडायाम् अद्य अहमदाबादस्य नरेन्द्रमोदीस्टेडियम् इति क्रीडाङ्गणे सायं सार्ध-सप्तवादने गुजरात-टाईटन्स्-दलं पञ्जाब-किंग्स्-दलं सम्मुखीकरिष्यति । ह्य जाते क्रीडाद्वन्द्वे कोलकाता-नाईटराईडर्स्-दलेन दिल्ली-केपिटल्स्-दलं षडधिकैकशतं धावनाङ्कैः पराजितम् ।

।। इति वार्ताः ।।